ध्यान गर्ने : फूल अक्षता हातमा लिएर हात जोडेर तलको मन्त्रले प्रार्थना गर्ने –

जटाजूटसमायुक्तां मर्द्धेन्दुकृत शेखराम् ।
लोचनत्रयसम्पन्नां पद्मेन्दुसदृशाननाम् ॥
अतसीपुष्पसङ्काशां सुप्रतिष्ठां सुलोचनाम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नव यौवनसम्पन्नां महिषासुरमर्दिनीम् ।
ध्यानम् समर्पयामि दुर्गादेव्यै नमः ॥

यो प्रार्थना गरेर अर्घ पूजन गरी दीप, कलश, गणेशको पूजा गरी भगवती दुर्गा देवीको माथि बताएको विधि अनुसार बस्त्र सौभाग्य द्रव्य समेत चढाई पूजा गर्नु नव पत्रिकामा पनि सप्तमीको जस्तै विधिले पूजागरी दुर्गा देवीको ध्यान गरी धूप, वत्ती नैवेद्यहरू, विशेष परिकार जुन तयार पारिएका छन् सबै चढाई, पिउनेजल चढाई भेटी पनि चढाउने, निराजन गर्ने।

फूल अक्षता लिएर देवीको दक्षिण भागमा नाम पिच्छे पूजा गर्ने –

१. ॐ जयन्त्यै नमः २. ॐ मङ्गलायै नमः ३. ॐ काल्यै नमः ४. ॐ भद्रकाल्यै नमः ५. ॐ कपालिन्यै नमः ६. ॐ दुर्गायै नमः ७. ॐ क्षमायै नमः ८.ॐ शिवायै नमः ९. ॐ धात्र्यै नमः १०. ॐ स्वाहायै नम ११ ॐ स्वधायै नमः ।

फूल अक्षता लिएर देवीको बाँया भागमा नाम पिच्छे पूजा गर्ने –

१. ॐ ह्रीँ उग्रदंष्ट्रायै नमः २. ॐ ह्रीँ सुद्रष्ट्रायै नमः ३. ॐ ह्रीँ करालिन्यै नमः ४. ॐ ह्रीँ पिङ्गनेत्रायै नमः ५. ॐ ह्रीँ विशालाक्षी देव्यै नमः ६. ॐ ह्रीँ मङ्गलायै नमः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

७. ॐ ह्रीँ धृत्यै नमः ८. ॐ ह्रीँ आनन्दायै नमः
९. ॐ ह्रीँ सुनन्दायै नमः ।

फूल अक्षता लिएर देवीको अग्रमागमा नाम पिच्छे पूजा गर्ने –

१. ॐ ह्रीँ मङ्गलायै नमः २ ॐ ह्रीँ नन्दिन्यै नमः
३. ॐ ह्रीँ भद्रायै नमः ४.ॐ ह्रीँ लक्ष्म्यै नमः
५. ॐ ह्रीँ कीर्त्यै नमः ६. ॐ ह्रीँ यशस्विन्यै नमः
७. ॐ ह्रीँ पुष्ट्यै नमः ८. ॐ ह्रीँ मेधायै नमः
९. ॐ ह्रीँ शिवायै नमः १०. ॐ ह्रीँ साध्व्यै नमः
११. ॐ ह्रीँ यशोवत्यै नमः १२. ॐ ह्रीँ शोभायै नमः
१३. ॐ ह्रीँ जयायै नमः १४. ॐ ह्रीँ धृत्यै नमः
१५. ॐ ह्रीँ आनन्दायै नमः १६. ॐ ह्रीँ सुनन्दायै नमः ।

फूल अक्षता लिएर देवीको पृष्ट भागमा नाम पिच्छे पूजा गर्ने –

१. ॐ ह्रीँ जयन्त्यै नमः २. ॐ ह्रीँ मङ्गलायै नमः
३. ॐ ह्रीँ धृत्यै नमः ४. ॐ ह्रीँ शान्त्यै नमः
५. ॐ ह्रीँ श्यामायै नमः ६. ॐ ह्रीँ ब्रह्माण्यै नमः
७. ॐ ह्रीँ कोशिक्यै नमः ८. ॐ ह्रीँ दुर्गायै नमः
९. ॐ ह्रीँ क्रियायै नमः १०. ॐ ह्रीँ घण्टाकर्णायै नमः
११. ॐ ह्रीँ कपालिन्यै नमः १२. ॐ ह्रीँ रुद्रायै नमः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१३. ॐ ह्रीँ क्षमायै नमः १४. ॐ ह्रीँ काल्यै नमः
१५. ॐ ह्रीँ भीमायै नमः १६. ॐ ह्रीँ भद्रायै नमः
१७. ॐ ह्रीँ सिद्ध्यै नमः १७.ॐ ह्रीँ पुष्ट्यै नमः
१९. ॐ ह्रीँ भद्रकाल्यै नमः ।

फूल अक्षता लिएर देवीको अग्रभागमा ६४ देवीको नाम पिच्छे पूजा गर्ने –

१. ॐ ह्रीँ वीजायै नमः २. ॐ ह्रीँ मङ्गलायै नमः
३. ॐ ह्रीँ धृत्यै नमः ४. ॐ ह्रीँ भद्रायै नमः
५. ॐ ह्रीँ शान्त्यै नमः ६. ॐ ह्रीँ शिवायै नमः
७. ॐ ह्रीँ क्षमायै नमः ८. ॐ ह्रीँ सिद्ध्यै नमः
९. ॐ ह्रीँ तुष्ट्यै नमः १०. ॐ ह्रीँ पुष्ट्यै नमः
११. ॐ ह्रीँ उमायै नमः १२. ॐ ह्रीँ श्रियैनमः
१३. ॐ ह्रीँ ऋध्यै नमः १४. ॐ ह्रीँ दीप्तायै नमः
१५. ॐ ह्रीँ कान्त्यै नमः १६. ॐ ह्रीँ यशोधायैं नमः
१७. ॐ ह्रीँ लक्ष्म्यै नमः १८. ॐ ह्रीँ ऐश्वर्यै नमः
१९. ॐ ह्रीँ बृद्ध्यै नमः २०. ॐ ह्रीँ शक्त्यै नमः
२१. ॐ ह्रीँ जयावत्यै नमः २२. ॐ ह्रीँ ब्राह्मयै नमः
२३. ॐ ह्रीँ जयन्त्यै नमः २४. ॐ ह्रीँ अपराजितायै नमः
२५. ॐ ह्रीँ अजितायै नमः २६. ॐ ह्रीँ मानस्यै नमः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२७. ॐ ह्रीँ दित्यै नम : २८. ॐ ह्रीँ मायायै नमः
२९. ॐ ह्रीँ माहामायायै नमः ३०. ॐ ह्रीँ मोहिन्यै नमः
३१. ॐ ह्रीँ रत्यै नमः ३२. ॐ ह्रीँ लालसायै नमः
३३. ॐ ह्रीँ धात्र्यै नमः ३४. ॐ ह्रीँ तारायै नमः
३५. ॐ ह्रीँ विमलायै नमः ३६. ॐ ह्रीँ गौर्यै नमः
३७ ॐ ह्रीँ शरण्यायै नमः ३८. ॐ ह्रीँ कौशिक्यै नमः
३९. ॐ ह्रीँ मत्यै नमः ४०. ॐ ह्रीँ दुर्गायै नमः
४१. ॐ ह्रीँ क्रियायै नमः४२. ॐ ह्रीँ अरुन्धत्यै नमः
४३. ॐ ह्रीँ कर्णायै नमः ४४. ॐ ह्रीँ कपालिन्यै नमः
४५. ॐ ह्रीँ रुद्रायै नमः ४६. ॐ ह्रीँ काल्यै नमः
४७. ॐ ह्रीँ माधुर्यै नमः ४८. ॐ ह्रीँ त्रिनेत्रायै नमः
४९. ॐ ह्रीँ स्वरूपिण्यै नमः ५०. ॐ ह्रीँ बहुरूपायै नमः
५१. ॐ ह्रीँ रिपुहन्त्र्यै नमः ५२. ॐ ह्रीँ अम्बिकायै नमः
५३. ॐ ह्रीँ चर्चिकायै नमः ५४. ॐ ह्रीँ सुरपूजितायै नमः
५५. ॐ ह्रीँ वैवस्वत्यै नमः ५६. ॐ ह्रीँ कौमार्यै नमः
५७. ॐ ह्रीँ वैष्णव्यै नमः ५८. ॐ ह्रीँ माहेश्वर्यै नमः
५९. ॐ ह्रीँ शिवदूत्यै नमः ६०. ॐ ह्रीँ कार्तिक्यै नमः
६१. ॐ ह्रीँ कुशिकायै नमः ६२. ॐ ह्रीँ चामुण्डायै नमः
६३. ॐ ह्रीँ भगवत्यै नमः ६४. ॐ ह्रीँ चण्डिकायै नमः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

फूल अक्षता लिएर आठ दिशामा अष्ट मातृकाको नाम पिच्छे पूजा गर्ने—

१. ॐ ह्रीँ ब्राह्मयै नमः २. ॐ ह्रीँ माहेश्वर्यै नमः
३. ॐ ह्रीँ कौमार्यै नमः ४. ॐ ह्रीँ वैष्णव्यै नमः
५. ॐ ह्रीँ वाराह्यै नमः ६. ॐ ह्रीँ इन्द्राण्यै नमः
७. ॐ ह्रीँ चामुण्डायै नमः ८. ॐ ह्रीँ महालक्ष्मै नमः ॥

माथि लेखिए अनुसारका मन्त्रहरू पढी धुप, द्वीप, नैबेद्य विशेष परिकार जुन तयार गरिएका छन् सवै नैवेद्यहरू चढाई भेटी चमर पंखा, ऐना आदि समर्पण गरी जप ध्यान आदि गर्नु।

भैरवको आवाहन गरी षोडशोपचारले— भो भैरब इह आगच्छ इह तिष्ठ यावत् पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव वरदोभव ॥ भनी आवाहन गरी— आसनं, पाद्यम्, अर्ध्यम्, आचमनीयम्, मधुपर्कं, गङ्गाजलं, पञ्चामृत, शुद्धोदक स्नानं, वस्त्रं, सौभाग्यद्रव्यं, चन्दनं, सिन्दूरम् ,आलक्तकं, यव तिलान्, पुष्पाणि, धूपम् , दीपम्, नैवैद्यं, पानीयम्, फलादि नैवैद्यम् ताम्बूलम् पूगीफलादिकम्, दक्षिणा द्रव्यम्, निराजनम् समर्पयामि भैरवाय नमः ॥ भनी पूजा गर्ने।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

फूल अक्षता लिई प्रार्थना गर्ने मन्त्र –

भैरवं परमं देवं सर्वकाम प्रसाधनम् ।
पूजयाम्यग्रतो देव्याः सर्वेप्सित फल प्रदम् ॥
ॐ दुर्गे दुर्गे रक्षणि स्वाहा दुर्गा देव्यै नमः ॥

अर्घ दिने र श्रीखण्ड चन्दन चढाउने ।

वेलपत्र भगवतीलाई चढाउने मन्त्र –

अमृतोद्भव श्री बृक्षः शङ्करस्य सदाप्रियः ।
पवित्रं ते प्रयच्छामि विल्व पत्रं सुरेश्वरि ।
विल्व पत्रं समर्पयामि दुर्गादेव्यै नमः ॥

भगवतीलाई बेलपत्रको माला चढाउने मन्त्र –

चन्दनेन समालिप्तां कुंकुमेन विलेपिताम् ।
विल्वपत्रकृतांमालां गृहाण सुरवन्दिते ।
विल्वपत्र मालां समर्पयामि दुर्गा देव्यै नमः ॥

सिंहको पूजा गर्ने –

ॐ हूँ महाशार्दूलवितानाय पिङ्गललोचनाय सिंहाय नमः ॥

अस्त्रहरूको पूजा गर्ने –

सफा गरेर राखेको खड्ग, खुकुरी, छुरी आदिलाई काँचो धागोले ३ पटक बींड बेरी काठ आदिमा अड्याएर राखी पूजा गर्ने भएमा नौ संख्या पुऱ्याउने ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ॐ खड्गाय नमः, ॐ त्रिशूलाय नमः, ॐ वज्राय नमः, ॐ वाणाय नमः, ॐ चक्राय नमः, ॐ चर्मणे नमः, ॐ छुरिकायै नमः, ॐ कट्टारकाय नमः, ॐ धनुषे नमः, ॐ दुन्दुभ्यै नमः, ॐ कुन्ताय (भाला) नमः, ॐ चर्मकवचाय नमः ॥

अस्त्रको प्रार्थना–

असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ।
श्री गर्भो विजयश्चैव धर्मपाल नमोऽस्तुते ॥

कालरात्रीको विधि गर्नेले हवन गर्ने गरेको भए पण्डित बोलाई अग्निस्थापनाको विधि अनुसार गरी, पायसले भगवतीको मन्त्रले १०८ पटक हवन गर्ने। त्यसो नगर्नेले आफैले १०८ पटक मकलमा आगो बालि पायस हवन गर्ने। कुभिण्डोको बलि दिनेले बलिदान गर्ने, प्रसाद ग्रहण गर्ने।

महानवमी पूजा विधि

महानवमीको दिन माथि लेखिएको सङ्कल्प मम सम्म भनी अद्य आश्विन शुक्ल महानवम्यां सकल पापक्षय पूवर्क धर्म यशो दीर्घायुष्य ब्रह्मेन्द्र रुद्रादिलोक प्राप्ति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काम स्त्रिशूलिनी दुर्गा चण्डिका पूजयिष्ये ॥ भनी छाडि दिने र माथि पहिलो दिनमा बताएअनुसार नित्य पूजा पाठ गरी यी देवीहरूको पनि पूजा गर्ने–

ॐ त्रिशूलिन्यै नमः ॐ दुर्गायै नमः

ॐ शिवायै नमः ॐ शाङ्कर्यै नमः

ॐ चण्डिकायै नमः ।

दुर्गाको पूजा, पाठ, होम आदि माथि बताए अनुसार गर्ने॥

वाहनको पूजा

यस दिन वाहनहरूको पूजा अर्थात् विश्वकर्माको पूजा, मोटर मोटरसाइकल, मेशिन, हात्ति, घोडा आदि सबै वाहनहरूको पूजा गर्ने।

नवमीको दिन बलि दिनेले विधि पूर्वक बलि दिने। स्थापना गरेका सबै शस्त्रास्त्रहरूको पूजा धूप, बत्ती, नैवेद्य, भेटी समेत गर्ने। नवमीको पूजा पाठ होम आदि समाप्त गरी, कन्याको पूजा गरी वस्त्र, आदि दिने।

कुमारी पूजा विधि

शास्त्रमा वताए अनुसार सर्व लक्षण गुण सम्पन्न कुमारीको पाउ धोई, पाउको जलले आफ्नो शिरमा मार्जन गरी धोती, चोलो ओड्ने सौभाग्य आदि दिने। फूल अक्षता लिएर – ॐ आँ इँ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हूँ फट् भूता नपसारय विघ्नान्नाशय मम स्वाहा।
भनी फूल अक्षता चढाई विघ्नलाई हटाई पूजा गर्ने स्थानमा लाने।
हात जोडी प्रार्थना गर्ने मन्त्र –

ॐ नमस्ते जगतांमाये जगदा धार रूपिणि।
कुमारी रूपमास्थाय प्रविशेदंगृहं मम ॥
भगवत्याः कीदृशंरूपं जाने मातरहं नहि।
कुमारी रूपमेवेदं पश्यामि नरचक्षुषा ॥
भक्तिं मदीयां विज्ञाय त्वत्पादाम्बुजयोः शिवे।
त्वया प्रकटितं रूपं मीदृशीं सर्व सिद्धये ॥

शुद्ध आसनमा कुमारीलाई राखेर पूजा आरम्भ गर्ने। पहिले तीन पटक आचमन गरी। कुश जौ, तिल, जल लिई सङ्कल्प गर्ने –

ॐ अद्येह मम इष्ट देवता प्रीतये श्री कुमारी पूजन महं करिष्ये ॥ भनी छाडि दिने।

वायाँ तर्फ फूल अक्षताले– श्री गुरुभ्यो नमः ॥ भनी चढाउने, दक्षिण पट्टि– गँ गणेशाय नमः ॥ भनी, माझमा– ऐँ ह्रीँ श्रीँ कुमार्यै नमः ॥ भनी चढाई नमस्कार गर्ने।

सामान्य अर्घ्य स्थापना गरी पूजा गर्ने गोडा धोई जल खाने –

कुमारीलाई जल चढाउने–
ऐँ ह्रीँ श्रीँ कुमार्यैनमः पाद्यं समर्पयामि।
अर्घ जल चढाउने–

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऐं ह्रीं श्रीं कुमार्यैनमः अर्घ्यं समर्पयामि ।

पुनः जल चढाउने–

ऐं ह्रीं श्रीं श्रीकुमार्यै नमः आचमनीयं समर्पयामि ।

रक्त वस्त्र चढाउने–

ऐं ह्रीं श्रीं कुमार्यै नम :रक्त वस्त्रं समर्पयामि ।

सिंगारका सामान चढाउने–

ऐं ह्रीं श्रीं कुमार्यै नमः अलङ्कारान् समर्पयामि ।

चन्दन चढाउने–

ऐं ह्रीं श्रीं कुमार्यै नमः गन्धं समर्पयामि ।

सिन्दूर चढाउने–

ऐं ह्रीं श्रीं कुमार्यै नमः सिन्दूरं समर्पयामि

गाजल चढाउने–

ऐं ह्रीं श्रीं कुमार्यै नमः कज्जलं समर्पयामि

फूल चढाउने –

ऐं ह्रीं श्रीं कुमार्यै नमः पुष्पं समर्पयामि ।

धूप देखाउने–

ऐं ह्रीं श्रीं कुमार्यै नमः धूपम् आघ्रापयामि ।

बत्ति देखाउने –

ऐं ह्रीं श्रीं कुमार्यै नमः दीपं प्रदर्शयामि ।

नैवेद्य चढाउने–

ऐं ह्रीं श्रीं कुमार्यै नमः नैवेद्यं समर्पयामि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भेटी चढाउने–

ऐं ह्रीं श्रीं कुमार्यै नमः दक्षिणां समर्पयामि ।

पान मसला चढाउने–

ऐं ह्रीं श्रीं कुमार्यै नमःताम्बूलं समर्पयामि ।

तीनपटक अञ्जलीमा फूल चढाउने–

ऐं ह्रीं श्रीं कुमार्यै नमः

पुष्पाञ्जलि लिई कन्या कुमारीको प्रार्थना गर्ने मन्त्र –

जगत्पूज्ये सवर्वन्द्ये सर्वशक्तिस्वरूपिणि ।
पूजांगृहाण कौमारि जगन्मात र्नमोऽस्तुते ॥

कुमारको पूजा गर्ने चलन भएकाहरूले कुमारको पनि कन्यालाई पूजा गरे जस्तै– कुमारायनमः ॥ भनी जल, अर्घजल, पुनराचमनीय, पञ्चामृत, शुद्धजल, वस्त्र, सिंगारको सामान, चन्दन, सिन्दूर, फूल, धूप, बत्ती, नैवेद्य, भेटी, पान मसला, आदि चढाई पूजा गर्ने । कन्या कुमारबाट प्रसाद लिई लगाउने ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विज़या दशमी

विजया दशमीको दिन भगवतीको साविक बमोजिम सबै पूजा गर्ने र विशेषमा जौ तिल कुश पानी लिएर सङ्कल्प गर्ने माथि बतएअनुसार सङ्कल्पको मम सम्म पडेर अद्य आश्विन शुक्ल दशम्यां विजय सिध्यर्थं नवदुर्गा पूजाया न्यूनातिरिक्त परिपूर्णार्थम् अपराजिता देवी पूजन पूर्वकं विसर्जन महं करिष्ये ॥ भनी छाडि दिने। दीप, कलश ,गणेशको पूजन पूर्वक देवीको पूजा गर्ने चन्दनले थालीमा अष्ट दल लेखेर प्रतिमा अथवा सुपारी बीचमा रखेर पूजा गर्ने - मध्य मागमा — ॐ अपराजितायै नमः ॥ दाहिने तर्फ– क्रियासिध्यै जयायै नमः ॥ बायाँ तर्फ– उमायै विजयायै नमः ॥ भनी पूजा गर्ने। पहेलो कपडामा अपरा- जिताको पात, बेसार सर्स्यू दुवो राता अक्षता राखेर ॐ भनेर धागोले पोटलिका बाधेर प्रतिष्ठा गरी पोटलिकाको विधिपूर्वक पूजा गरी यो मन्त्रले प्रार्थना गर्ने -

सदाऽपराजितायस्मात् त्वं लतासूत्तमा स्मृता ।
सर्वकामार्थ सिध्यर्थं तस्मात् त्वां पूजयाम्यहम् ॥
भवापराज़िते देवि मम सर्व समृद्धये ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूजितायां त्वयि श्रेयो ममास्तु दुरितं हतम् ॥

यो मन्त्रले अपराजिता भगवतीमा पुष्पाञ्जलि चढाएर विसर्जन गरी पछि कर्ताले दाहिने हातमा धारणा गर्नु पर्दछ, धारण गर्ने मन्त्र –

जयदे वरदे देवि दशम्यामपराजिते ।
धारयामि भुजे दक्षे जयलाभाभिबृद्धये ॥
बलमाधेहि सततं मम शत्रौ पराजयम् ।
त्वद्धारणात् भवेयुर्मे धनधान्यसमृद्धयः ॥

यो मन्त्रले हातमा बाधने त्यसपछि यसदिन पाठ होम आदि गर्नु पर्दैन भगवतीको पुष्पाञ्जलि, प्रार्थना, नमस्कार गरी अर्घ निवेदन गर्ने मन्त्र –

गन्धाक्षतैश्च संयुक्तं फल पुष्प युतं तव ।
दत्तमर्घ्यं गृहाणेदं प्रसीद परमेश्वरि ।
इदम् अर्घ्यम् समर्पयामि दुर्गा देव्यै नमः ।

मूल देवीको प्रार्थना गर्ने मन्त्र –

रूपंदेहि यशोदेहि भगं भवति देहिमे ।
पुत्रान्देहि तथा मातः सर्व कामांश्च देहिमे ॥
महिषघ्नि महामाये चामुण्डे मुण्ड मालिनि ।
आयुरारोग्य मैश्वर्यं देहि देवि नमोस्तुते ॥

यो मन्त्र पढेर नमस्कार गर्ने ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूर्णपात्र दान

पूर्णपात्रको पूजागरी सङ्कल्प गर्न हातमा लिने । माथि बताएको सङ्कल्पको मम सम्म भने पछि पूर्वोक्त फल प्राप्त्यर्थं आश्विन शुक्ल प्रतिपद आरभ्य नवमी पर्यन्तं महाकाली, महालक्ष्मी, महासरस्वती रूपाया दुर्गा देव्या पूजन कर्मण स्तथा सप्तशत्याः पाठ कर्मणः सप्तमीत आरभ्य नवमी पर्यन्तं कृतस्य हवन कर्मणश्च साफल्यार्थं मिदं तण्डुल पूर्णपात्रं प्रजापति दैवतं ....गोत्राय शर्मणे ब्राह्मणायतुभ्य महं संप्रददे तत्सन्न मम ॥

दक्षिणा सङ्कल्प

दक्षिणा द्रव्यलाई पूजागरी कुश जल लिई उठाउने र माथि लेखिएको सङ्कल्पको मम सम्म भने पछि पूर्ण पात्रको पूर्वोक्त फल प्राप्त्यर्थं देखि ..... हवन कर्मणश्च साफल्यार्थं सम्म भनी इदं दक्षिणा द्रव्यं रौप्यं चन्द्र दैवताकम् .... गोत्राय शर्मणे ब्राह्मणाय तुभ्य महं संप्रददे तत्सन्नमम ॥

दहि, अक्षता, लिई जमरा, घडा, दियो, महामाया, खड्ग आदिलाई चढाई घडालाई उठाउने मन्त्र –

ॐ उतिष्ठ देवि चामुण्डे शुभपूजां प्रगृह्य च ।
कुरुष्व मम कल्याण मष्टाभिः शक्तिभिःसह ॥
गच्छ गच्छ परंस्थान स्वस्थानं देवि चण्डिके ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. श्रीसप्तश्लोकी दुर्गा पाठ

शिव उवाच

देवि त्वं भक्तसुलभे सर्वकार्यविधायिनि
कलौ हि कार्यसिद्ध्यर्थमुपायं ब्रूहि यन्त्रतः ॥

देव्युवाच

श्रृणु देवं प्रवक्ष्यामि कलौ सर्वेष्टसाधनम् ।
मया तवैव स्नेहेनाप्यम्बास्तुतिः प्रकाश्यते ॥

विनियोग–

अस्य श्रीदुर्गासप्तश्लोकीस्तोत्रमन्त्रस्य नारायण ऋषिः, अनुष्टुप् छन्दः, श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः, श्रीदुर्गाप्रीत्यर्थं सप्तश्लोकीदुर्गापाठे विनियोगः ।

ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥ १ ॥
दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दारिद्र्य दुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता ॥ २ ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥३॥
शरणागतदीनार्तपरित्राणपरायणे ।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥४॥
सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥५॥
रोगानशेषानपहंसि तुष्टा रुष्टा
तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥६॥
सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥७॥

॥ श्रीसप्तश्लोकी दुर्गा स्तुतिः सम्पूर्णा ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ दुर्गाकवच प्रारम्भः

ॐ अस्य श्रीचण्डीकवचस्य ब्रह्मा ऋषिः अनुष्टुप् छन्दः चामुण्डा देवता अङ्गन्यासोक्तमातरो बीजं दिग्बन्धदेवतास्तत्त्वं श्रीजगदम्बाप्रीत्यर्थे दुर्गाकवच पाठ जपे विनियोगः ॥

ॐ नमश्चण्डिकायै ॥ मार्कण्डेय उवाच

ॐ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥१॥

ब्रह्मोवाच

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ।
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥२॥
प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी ।
तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् ॥३॥
पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च ।
सप्तमं कालरात्रीति महागौरीति चाष्टमम् ॥४॥
नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः ।
उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥५॥
अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ।
विषमे दुर्गमे चैव भयार्त्ताः शरणं गताः ॥६।
न तेषां जायते किञ्चिदशुभं रणसंकटे ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नापदं तस्य पश्यामि शोकदुःखभयं न हि ॥७॥
यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते ।
ये त्वां स्मरन्ति देवेशि रक्षसे तान्न संशयः ॥८॥
प्रेतसंस्था तु चामुण्डा वाराही महिषासना ।
ऐन्द्री गजसमारूढा वैष्णवी गरुडासना ॥९॥
माहेश्वरी वृषारूढा कौमारी शिखिवाहना ।
लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥१०॥
श्वेतरूपधरा देवी ईश्वरी वृषवाहना ।
ब्राह्मी हंससमारुढा सर्वाभरणभूषिता ॥११॥
इत्येता मातरः सर्वाः सर्वयोगसमन्विताः ।
नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥१२॥
दृश्यन्ते रथमारुढा देव्यः क्रोधसमाकुलाः ।
शङ्खं चक्रं गदां शक्तिं हलं च मुसलायुधम् ॥१३॥
खेटकं तोमरं चैब परशुं पाशमेव च ।
कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् ॥१४॥
दैत्यानां देहनाशाय भक्तानामभयाय च ।
धारयन्त्यायुधानीत्थं देवानां च हिताय वै ॥१५॥
नमस्तेऽस्तु महारौद्रे महाघोरपराक्रमे ।
महाबले महोत्साहे महाभयविनाशिनि ॥१६॥
त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्द्धिनि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता ॥१७॥
दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी ॥
प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी ॥१८॥
उदीच्यां पातु कौमारी ऐशान्यां शूलधारिणी ।
ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद् वैष्णवी तथा ॥१९॥
एवं दश दिशो रक्षेच्चामुण्डा शववाहना ।
जया मे चाग्रतः पातु विजया पातु पृष्ठतः ॥२०॥
अजिता वामपार्श्वे तु दक्षिणे चापराजिता ।
शिखामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ॥२१॥
मालाधरी ललाटे च भ्रुवौ रक्षेद् यशस्विनी ।
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके ॥२२॥
शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ।
कपोलौ कालिका रक्षेत्कर्णमूले तु शाङ्करी ॥२३॥
नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ।
अधरे चामृतकला जिह्वायां च सरस्वती ॥२४॥
दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका ।
घण्टिकां चित्रघण्टा च महामाया च तालुके ॥२५॥
कामाक्षी चिवुकं रक्षेद् वाचं मे सर्वमङ्गला ।
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥२६॥
नीलग्रीवा बहिःकण्ठे नलिकां नलकूबरी ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्कन्धयोः खड्गिनी रक्षेद् बाहू मे बज्रधारिणी ॥२७॥
हस्तयोर्दन्डिनी रक्षेदम्बिका चाङ्गुलिषु च ।
नखाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेत्कुलेश्वरी ॥२८॥
स्तनौ रक्षेन्महादेवी मनः शोकविनाशिनी ।
हृदये ललिता देवी उदरे शूलधारिणी ॥२९॥
नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा ।
पूतना कामिका मेढ्रं गुदे महिषवाहिनी ॥३०॥
कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी ।
जङ्घे महाबला रक्षेत्सर्वकामप्रदायिनी ॥३१॥
गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी ।
पादाङ्गुलीषु श्री रक्षेत्पादाधस्तलवासिनी ॥३२॥
नखान् दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी ।
रोमकूपेषु कौवेरी त्वचं वागीश्वरी तथा ॥३३॥
रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ।
अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥३४॥
पद्मावती पद्मकोशे कफे चूडामणिस्तथा ।
ज्वालामुखी नखज्वालामभेद्या सर्वसन्धिषु ॥३५॥
शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा ।
अहंकारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी ॥३६॥
प्राणापानौ तथा व्यानमुदानं च समानकम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

वज्रहस्ता च मे रक्षेत्प्राणं कल्याणशोभना ॥३७॥
रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी।
सत्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥३८॥
आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी।
यशः कीर्तिं च लक्ष्मीं च धनंविद्यां च चक्रिणी ॥३९॥
गोत्रमिन्द्राणि मे रक्षेत्पशून्मे रक्ष चण्डिके।
पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ॥४०॥
पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा।
राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता ॥४१॥
रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु।
तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी ॥४२॥
पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः।
कवचेनावृत्तो नित्यं यत्र यत्रैव गच्छति ॥४३॥
तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः।
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम्।
परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् ॥४४॥
निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः।
त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् ॥४५॥
इदं तु देव्याः कवचं देवानामपि दुर्लभम्।
यः पठेत्प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः ॥४६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दैवी कला भवेत्तस्य त्रैलोक्येष्वपराजितः ।
जीवेद् वर्षशतं साग्रमपमृत्युविवर्जितः ॥४७॥
नश्यन्ति व्याधयः सर्वे लूताविस्फोटकादयः ।
स्थावरं जङ्गमं चैव कृत्रिमं चापि यद्विषम् ॥४८॥
अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले ।
भूचराः खेचराश्चैव जलजाश्चोपदेशिकाः ॥४९॥
सहजा कुलजा माला डाकिनी शाकिनी तथा
अन्तरिक्षचरा घोरा डाकिन्यश्च महावलाः ॥५०॥
ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः ।
ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः ॥५१॥
नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ।
मानोन्नतिर्भवेद् राज्ञस्तेजोवृद्धिकरं परम् ॥५२॥
यशसा वर्द्धते सोऽपि कीर्तिमण्डितभूतले ।
जपेत्सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ॥५३॥
यावद्भूमण्डलं धत्ते सशैलवनकाननम् ।
तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी ॥५४॥
देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ।
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥५५॥
लभते परमं रूपं शिवेन सह मोदते ॥ॐ॥५६॥

इति देव्याः कवचं सम्पूर्णम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. श्रीसप्तश्लोकी दुर्गा पाठ

शिव उवाच

देवि त्वं भक्तसुलभे सर्वकार्यविधायिनि
कलौ हि कार्यसिद्ध्यर्थमुपायं ब्रूहि यन्त्रतः ॥

देव्युवाच

श्रृणु देव प्रवक्ष्यामि कलौ सर्वेष्टसाधनम् ।
मया तवैव स्नेहेनाप्यम्बास्तुतिः प्रकाश्यते ॥

विनियोग–

अस्य श्रीदुर्गासप्तश्लोकीस्तोत्रमन्त्रस्य नारायण ऋषिः, अनुष्टुप् छन्दः, श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः, श्रीदुर्गाप्रीत्यर्थं सप्तश्लोकीदुर्गापाठे विनियोगः ।

ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥ १ ॥
दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दारिद्र्य दुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता ॥ २ ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥३॥
शरणागतदीनार्तपरित्राणपरायणे ।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥४॥
सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥५॥
रोगानशेषानपहंसि तुष्टा रुष्टा
तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥६॥
सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥७॥

॥ श्रीसप्तश्लोकी दुर्गा स्तुतिः सम्पूर्णा ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ दुर्गाकवच प्रारम्भः

ॐ अस्य श्रीचण्डीकवचस्य ब्रह्मा ऋषिः अनुष्टुप् छन्दः चामुण्डा देवता अङ्गन्यासोक्तमातरो बीजं दिग्बन्धदेवतास्तत्त्वं श्रीजगदम्बाप्रीत्यर्थे दुर्गाकवच पाठ जपे विनियोगः ॥

ॐ नमश्चण्डिकायै ॥ मार्कण्डेय उवाच

ॐ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥१॥

ब्रह्मोवाच

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ।
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥२॥
प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी ।
तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् ॥३॥
पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च ।
सप्तमं कालरात्रीति महागौरीति चाष्टमम् ॥४॥
नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः ।
उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥५॥
अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ।
विषमे दुर्गमे चैव भयार्त्ताः शरणं गताः ॥६।
न तेषां जायते किञ्चिदशुभं रणसंकटे ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नापदं तस्य पश्यामि शोकदुःखभयं न हि ॥७॥
यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते।
ये त्वां स्मरन्ति देवेशि रक्षसे तान्न संशयः ॥८॥
प्रेतसंस्था तु चामुण्डा वाराही महिषासना।
ऐन्द्री गजसमारूढा वैष्णवी गरुडासना ॥९॥
माहेश्वरी वृषारूढा कौमारी शिखिवाहना।
लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥१०॥
श्वेतरूपधरा देवी ईश्वरी वृषवाहना।
ब्राह्मी हंससमारुढा सर्वाभरणभूषिता ॥११॥
इत्येता मातरः सर्वाः सर्वयोगसमन्विताः।
नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥१२॥
दृश्यन्ते रथमारुढा देव्यः क्रोधसमाकुलाः।
शङ्खं चक्रं गदां शक्तिं हलं च मुसलायुधम् ॥१३॥
खेटकं तोमरं चैब परशुं पाशमेव च।
कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् ॥१४॥
दैत्यानां देहनाशाय भक्तानामभयाय च।
धारयन्त्यायुधानीत्थं देवानां च हिताय वै ॥१५॥
नमस्तेऽस्तु महारौद्रे महाघोरपराक्रमे।
महाबले महोत्साहे महाभयविनाशिनि ॥१६॥
त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्द्धिनि।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता ॥१७॥
दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी ॥
प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी ॥१८॥
उदीच्यां पातु कौमारी ऐशान्यां शूलधारिणी ।
ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद् वैष्णवी तथा ॥१९॥
एवं दश दिशो रक्षेच्चामुण्डा शववाहना ।
जया मे चाग्रतः पातु विजया पातु पृष्ठतः ॥२०॥
अजिता वामपार्श्वे तु दक्षिणे चापराजिता ।
शिखामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ॥२१॥
मालाधरी ललाटे च भ्रुवौ रक्षेद् यशस्विनी ।
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके ॥२२॥
शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ।
कपोलौ कालिका रक्षेत्कर्णमूले तु शाङ्करी ॥२३॥
नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ।
अधरे चामृतकला जिह्वायां च सरस्वती ॥२४॥
दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका ।
घण्टिकां चित्रघण्टा च महामाया च तालुके ॥२५॥
कामाक्षी चिवुकं रक्षेद् वाचं मे सर्वमङ्गला ।
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥२६॥
नीलग्रीवा बहिःकण्ठे नलिकां नलकूबरी ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्कन्धयोः खड्गिनी रक्षेद् बाहू मे बज्रधारिणी ॥२७॥
हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलिषु च ।
नखाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेत्कुलेश्वरी ॥२८॥
स्तनौ रक्षेन्महादेवी मनः शोकविनाशिनी ।
हृदये ललिता देवी उदरे शूलधारिणी ॥२९॥
नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा ।
पूतना कामिका मेढ्रं गुदे महिषवाहिनी ॥३०॥
कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी ।
जङ्घे महाबला रक्षेत्सर्वकामप्रदायिनी ॥३१॥
गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी ।
पादाङ्गुलीषु श्री रक्षेत्पादाधस्तलवासिनी ॥३२॥
नखान् दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी ।
रोमकूपेषु कौवेरी त्वचं वागीश्वरी तथा ॥३३॥
रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ।
अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥३४॥
पद्मावती पद्मकोशे कफे चूडामणिस्तथा ।
ज्वालामुखी नखज्वालामभेद्या सर्वसन्धिषु ॥३५॥
शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा ।
अहंकारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी ॥३६॥
प्राणापानौ तथा व्यानमुदानं च समानकम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बज्रहस्ता च मे रक्षेत्प्राणं कल्याणशोभना ॥३७॥
रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी ।
सत्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥३८॥
आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी ।
यशः कीर्तिं च लक्ष्मीं च धनंविद्यां च चक्रिणी ॥३९॥
गोत्रमिन्द्राणि मे रक्षेत्पशून्मे रक्ष चण्डिके ।
पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ॥४०॥
पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा ।
राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता ॥४१॥
रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ।
तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी ॥४२॥
पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ।
कवचेनावृत्तो नित्यं यत्र यत्रैव गच्छति ॥४३॥
तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः ।
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ।
परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् ॥४४॥
निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः ।
त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् ॥४५॥
इदं तु देव्याः कवचं देवानामपि दुर्लभम् ।
यः पठेत्प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः ॥४६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दैवी कला भवेत्तस्य त्रैलोक्येष्वपराजितः ।
जीवेद् वर्षशतं साग्रमपमृत्युविवर्जितः ॥४७॥
नश्यन्ति व्याधयः सर्वे लूताविस्फोटकादयः ।
स्थावरं जङ्गमं चैव कृत्रिमं चापि यद्विषम् ॥४८॥
अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले ।
भूचराः खेचराश्चैव जलजाश्चोपदेशिकाः ॥४९॥
सहजा कुलजा माला डाकिनी शाकिनी तथा
अन्तरिक्षचरा घोरा डाकिन्यश्च महावलाः ॥५०॥
ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः ।
ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः ॥५१॥
नश्यन्ति दर्शनात्तस्य कवचे ह्वदि संस्थिते ।
मानोन्नतिर्भवेद् राज्ञस्तेजोवृद्धिकरं परम् ॥५२॥
यशसा वर्द्धते सोऽपि कीर्तिमण्डितभूतले ।
जपेत्सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ॥५३॥
यावद्भूमण्डलं धत्ते सशैलवनकाननम् ।
तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी ॥५४॥
देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ।
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥५५॥
लभते परमं रूपं शिवेन सह मोदते ॥ॐ॥५६॥

इति देव्याः कवचं सम्पूर्णम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथार्गलास्तोत्रम्

ॐ अस्य श्रीअर्गलास्तोत्रमन्त्रस्य विष्णुर्ऋषिः, अनुष्टुप् छन्दः, श्रीमहालक्ष्मीदेवता श्री जगदम्बा प्रीतये सप्तशतीपाठाङ्गत्वेन जपे विनियोगः ॥

ॐ नमश्चण्डिकायै ॥ मार्कण्डेय उवाच

ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवाधात्री स्वाहास्वधा नमोऽस्तु ते ॥१॥
जय त्वं देवि चामुण्डे जय भूतार्तिहारिणि ।
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ॥२॥
मधुकैटभविद्राविविधातृवरदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥३॥
महिषासुरनिर्णाशि भक्तानां सुखदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥४॥
रक्तबीजवधे देवि चण्डमुण्डविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥५॥
शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि ।
रूपं देहि जपं देहि यशो देहि द्विषो जहि ॥६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥७॥
अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥८॥
नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥९॥
स्तुवद्भ्यो भक्तिपूर्व त्वां चण्डिके व्याधिनाशिनि
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१०॥
चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥११॥
देहि सौभाग्यमारोग्यं देहि मे परमं सुखम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१२॥
विधेहि द्विषतां नाशं विधेहि बलमुञ्चकैः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१३॥
विधेहि देवि कल्याणं विधेहि परमां श्रियम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१४॥
सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१५॥
विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु ।
रूपं देहि जयंदेहि यशो देहि द्विषो जहि ॥१६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१७॥
चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ।
रूपं देहि जय देहि यशो देहि द्विषो जहि ॥१८॥
कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१९॥
हिमाचलसुतानाथसंस्तुते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२०॥
इन्द्राणीपतिसद्भावपूजिते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२१।
देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२२॥
देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२३॥
पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ।
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥२४॥
इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ।
स तु सप्तशतीसंख्यावरमाप्नोति सम्पदाम् ॥२५॥

इति देव्या अर्गलास्तोत्रं सम्पूर्णम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ कीलकस्तोत्र प्रारम्भः

ॐ अस्य श्रीकीलकमन्त्रस्य शिव ऋषिः, अनुष्टुप् छन्दः, श्रीमहासरस्वती देवता श्री जगदम्बाप्रीत्यर्थं सप्तसती पाठाङ्गत्वेन कीलकपाठ जपे विनियोगः ॥

ॐ नमश्चण्डिकायै ॥मार्कण्डेय उवाच

ॐ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्द्धधारिणे ॥१॥
सर्वमेतद्विजानीयान्मन्त्राणामभिकीलकम् ।
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः ॥२॥
सिद्धयन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि ।
एतेन स्तुवतां देवि स्तोत्रमात्रेण सिद्धयति ॥३॥
न मन्त्रो नौषधं तत्र न किञ्चिदपि विद्यते ।
विना जाप्येन सिद्धयेत सर्वमुच्चाटनादिकम् ॥४॥
समग्राण्यपि सिद्धयन्ति लोकशङ्कामिमां हरः ।
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम् ॥५॥
स्त्रोत्रं वै चण्डिकायास्तु तच्च गुप्तं चकार सः ।
समाप्तिर्न च पुण्यस्य तां यथावन्नियन्त्रणाम् ॥६॥
सोऽपि क्षेममवाप्नोति सर्वमेव न संशयः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कृष्णायां वा चतुर्दश्यामष्टाम्यां वा समाहितः ॥७॥
ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति ।
इत्थंरूपेण कीलेन महादेवेन कीलितम् ॥८॥
यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम् ।
स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः ॥९॥
न चैवाप्यटतस्तस्य भयं क्वापीह जायते ।
नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ॥१०॥
ज्ञात्वा प्रारभ्य कुर्वीत न कुर्वाणो विनश्यति ।
ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः ॥११॥
सौभाग्यादि च यत्किञ्चिद् दृश्यते ललनाजने ।
तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम् ॥१२॥
शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः ।
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥१३॥
ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः ।
शत्रुहानिः परो मोक्षःस्तूयते सा न किं जनैः ॥ॐ॥१४॥

इति देव्या किलकस्तोत्रं सम्पूर्णम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ काली– कवच प्रारम्भः

श्री गणेशाय नमः ॥ अथ प्राणप्रतिष्ठा ॥
ॐ प्राणप्रतिष्ठा मन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः ऋग्यजुः सामाथर्वाणि छन्दांसि जगत् सृष्टिकारिणी प्राण शक्तिर्देवता ॐ आं बीजं ह्रीं शक्तिः प्राणप्रतिष्ठा सिद्ध्यर्थे जपे विनियोगः ॥

ॐ कैलासशिखरारुढ शङ्करं वरदं शिवम् ।
गौरी प्रपच्छ सर्वज्ञं देवदेवं महेश्वरम् ॥१॥
देव्युवाच–
भगवन् देवदेवेश देवानाम्मार्गद प्रभो ॥
शत्रूणां येन नाशः स्यादात्मानं रक्षणं भवेत् ॥२॥
तद्ब्रूहि मे महाभागा गोप्यं यदपि मे प्रभो ! ॥
परमैश्वर्यमतुलं लभते येन तद्वद ॥३॥
भैरव उवाच
बक्ष्यामि ते महादेवि सर्वदेवविदाम्बरे ॥
अद्भुतं कवचं देव्यासर्वकामप्रसाधकम् ॥४॥
विशेषतः शत्रुनाशं सर्वरक्षाकरं नृणाम् ॥
सर्वारिष्टप्रशमनमभिचारविनाशनम् ॥५॥
सुखदम्भोगदं चैव वशीकरणमुत्तमम् ॥

मधुसूदन सुवेदी
CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शत्रुसङ्घाः क्षयं यान्ति भवन्ति व्याधिपीडिताः ॥६॥
दुःखिनो ज्वरिणश्चैव स्वाभीष्टप्रच्युतास्तथा ।
भोगदम्मोक्षदंचैव कालिका कवचं पठेत् ॥७॥

ॐ अस्य श्रीकालीकवचस्य भैरव ऋषि गायत्रीछन्दः श्रीकालीं देवता शत्रुसङ्घ नाशने विनियोगः ॥८॥

ध्यायेत्कालीं महामायां त्रिनेत्राम्बहुरूपिणीम् ॥
चतुर्भुजां ललज्जिह्वां पूर्णचन्द्रनिभाननाम् ॥९॥
नीलोत्पलदलप्रख्यां शत्रुसङ्घविदारिणीम् ॥
नरमुण्डं तथा खड्गं कमलञ्चाम्बरं तथा ॥१०॥
बिभ्राणां रक्तवदनां दंष्ट्रालीं घोररूपिणीम् ॥
अट्टाट्टहासनिरतां सर्वदा च दिगम्बराम् ॥११॥
शवासनस्थितां देवीं मुण्डमाला विभूषिताम् ॥
इति ध्वात्वा महादेवीं ततस्तुकवचं पठेत् ॥१२॥
ॐ कालीघोर रूपाढ्या सर्वकामप्रदा शुभा ।
सर्वदेवस्तुता देवी शत्रुनाशं करोतु मे ॥१३॥
ह्रीं ह्रीं ह्रीं रूपिणी चैव ह्रीं ह्रीं ह्रीं रूपिणीं तथा ॥
ह्रीँ ह्रीं क्षें क्षें स्वरूपा च सर्वशत्रून्विदारयेत् ॥१४॥
श्रीं ह्रीं ऐं रूपिणीं देवीं भव बन्धविमोचनी ॥

. Nepal Sanskrit Academy, Kathmandu Collection

देवी करालवदना ह्रौं रिपून् हन्तु सर्वदा ॥१५॥
शुम्भश्च निहतो दैत्यो निशुम्भश्च महासुरः ॥
अरिनाशाय वन्दे त्वां कालिकां शङ्करप्रियम् ॥१६॥
ब्राह्मी शैवी वैष्णवी च वाराही नारसिंहिका ॥
कौमार्यैन्द्री च चामुण्डा खादन्तु मम विद्विषः ॥१७॥
सुरेश्वरी घोररूपा चण्डमुण्डविनाशिनी ॥
मुण्ड मालावृताङ्गा च सर्वतः पातु मां सदा ॥१८॥
ह्रीं कालिके घोरदंष्ट्रे संस्तुते रुधिरप्रिये ॥
रुधिरा पूर्णवक्त्रे च रुधिरावृतसुस्तना ॥१९॥
मम शत्रून् खादय २, हिंसय २, हिंसय२, मारय २, भिन्धि २, छिन्धि २ उच्चाटय २, द्रावय २, शोषय २ स्वाहा। ॐ भञ्जय २, किरि २, किटि २, किटय २, मर्दय २, मोहय २, हर २, किटि ३, मम रिपून् ध्वंसय ३, भक्षय ३, त्रोटय ३, यातुधानी चामुण्डे सर्वजनान् राज्ञो राजपुरुषान् स्त्रियो मम वश्यान् कुरु २ तन, धन गजान् रथान् रत्नान् दिव्यां कामिनीं पुत्रान् राजश्रियं देहि २ यच्छ २ क्षां क्षीं क्षूं क्षैं क्षः स्वाहा।
इत्येतत्कवचं दिव्यं कथितं शम्भुना पुरा ॥
ये पठन्ति सदा तेषां ध्रुवं नश्यन्तिशत्रवः ॥२०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वैरिणः प्रलयं यान्ति व्याधिनाशो भवन्ति हिं ॥
धनहानिः पुत्रहानिर्नभवेत्तस्य सर्वदा ॥२१॥
सहस्त्रपठनात्सिद्धिः कवचस्य भवेत्तथा ॥
ततः कार्याणि सिध्यन्ति तथा शङ्करभाषितम् ॥२२॥
स्मशानाङ्गारमादाय चूर्णीकृत्वा प्रयत्नतः ॥
पादोदकेनसंपिष्वा लिखेल्लोहशलाकया ॥२३॥
भूमौ शत्रून् हीनरूपान् उत्तरशिरसंस्तथा ॥
हस्तं दत्त्वा तद्हृदये कवचं तु स्वयं पठेत् ॥२४॥
शत्रोः प्राणप्रतिष्ठां तु कुर्यान्मन्त्रेण मन्त्रवित् ॥
हन्यात् अस्त्रप्रहारेण शत्रुर्गच्छेद्यमालयम् ॥२५॥
ज्वलदङ्गारतापेन भवन्ति ज्वरिता द्विषः ॥
प्रोक्षणैर्वामपादेन दरिद्रो भवति ध्रुवम् ॥२६॥
वैरिनाशकरं प्रोक्तं कवचं वश्यकारकम् ॥
परमैश्यर्यदञ्चैव पुत्र पौत्रादिवृद्धिदम् ॥२७॥
प्रभातसमये चैव पूजाकाले च यत्नतः ॥
सायंकाले तथा पाठात् सर्वसिद्धिर्भवेद्ध्रुवम् ॥२८॥
शत्रुरुच्चाटनं याति देशाच्च विच्युतो भवेत् ॥
पश्चात् किंकरतामेति सत्यं सत्यं न संशय ॥२९॥
शत्रुनाशकरं देवि सर्वसम्पत्करे शुभे॥
सर्वदेवस्तुते देवि कालिके त्वां नमाम्यहम्॥३०॥

इति ऐन्द्रयामल तन्त्रे वैरिहरणकालिकाकवचं समाप्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सिद्धकुञ्जिकास्तोत्रमुत्तमम् ।

शिव उवाच

शृणु देवि प्रवक्ष्यामि कुञ्जिकास्तोत्रमुत्तमम् ।
येन मन्त्रप्रभावेण चण्डीजापः शुभो भवेत् ॥१॥
न कवचं नार्गलास्तोत्रं कीलकं न रहस्यकम् ।
न सूक्तं नापि ध्यानं च न न्यासो न च वार्चनम् ॥२॥
कुञ्जिकापाठमात्रेण दुर्गापाठफलं लभेत् ।
अति गुह्यतरं देवि देवानामपि दुर्लभम् ॥३॥
गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति ।
मारणं मोहनं वश्यं स्तम्भनोच्चाटनादिकम् ।
पाठमात्रेण संसिद्धयेत् कुञ्जिकास्तोत्रमुत्तमम् ॥४॥

अथ मन्त्रः

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चै ॥ ॐ ग्लौं हुं क्लीं जूं सः
ज्वालय ज्वालय ज्वल ज्वल प्रज्वल प्रज्वल
ऐं ह्रीं क्लीं चामुण्डायै विच्चै ज्वल हं सं लं क्षं फट् स्वाहा

॥ इतिमन्त्रः ॥

नमस्ते रुद्ररूपिण्यै नमस्ते मधुमर्दिनि ।
नमः कैटभहारिण्यै नमस्ते महिषार्दिनि ॥१॥
नमस्ते शुम्भहन्त्र्यै च निशुम्भासुरघातिनि ॥२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जाग्रतं हि महादेवि जपं सिद्धं कुरुष्व मे ।
ऐंकारी सृष्टिरूपायै ह्रींकारी प्रतिपालिका ॥३॥
क्लींकारी कामरूपिण्यै बीजरूपे नमोऽस्तु ते ।
चामुण्डा चण्डघाती च यैकारी वरदायिनी ॥४॥
विच्चे चाभयदा नित्यं नमस्ते मन्त्ररूपिणि ॥५॥
धां धीं धूं धूर्जटेः पत्नी वां वीं वूं वागधीश्वरी ।
क्रां क्रीं क्रूं कालिका देवि शां शीं शूं मे शुभं कुरु ॥६॥
हुं हुं हुंकाररूपिण्यै जं जं जं जम्भनादिनी ।
भ्रां भ्रीं भ्रूं भैरवी भद्रे जवान्यै ते नमो नमः ॥७॥
अं कं चं टं तं पं यं शं वीं दुं ऐं वीं हं क्षं
धिजाग्रं धिजाग्रं त्रोटय त्रोटय दीप्तं कुरु कुरु स्वाहा ॥
पां पीं पूं पार्वती पूर्णा खां खीं खूं खेचरी तथा ॥८॥
सां सीं सूं सप्तशती देव्या मन्त्रासिद्धिं कुरुष्व मे ॥
इदं तु कुञ्जिकास्तोत्रं मन्त्रजागर्तिहेतवे ।
अभक्ते नैव दातव्यं गोपितं रक्ष पार्वति ॥
यस्तु कुञ्जिकया देवि हीनां सप्तशतीं पठेत् ।
न तस्य जायते सिद्धिररण्ये रोदनं यथा ॥

इति श्रीरुद्रयामले गौरीतन्त्रे शिवपार्वतीसंवादे
कुञ्जिकास्तोत्रं सम्पूर्णम् ।
॥ॐ तत्सत् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काली अष्ट्रोत्तर शतनाम स्तोत्र –

श्री गणेशाय नमः । अथ काली अष्ट्रोत्तर शतनाम स्तोत्रम् ॥

ईश्वर उवाच–

शतनाम प्रवक्षामि श्रृणुष्व कमलानने ।
यस्य प्रशाद मात्रेण काली प्रीता भवेत् सती ॥१॥
ॐ सती साध्वी भवप्रीता भवानी भव मोचनी ।
आर्या काली जया चाद्या त्रिनेत्रा शूल धारिणी ॥२॥
पिनाकधारिणी चित्रा चन्द्रघण्ट्य महातपा ।
मनो बुद्धिरहंकारा चित्तरूपा चिताचितिः ॥३॥
सर्वमन्त्रमयी सत्तासत्यानन्दस्वरूपिणी ।
अनन्ता भाविनी भाव्या भव्यभाव्या सदा गतिः ॥४॥
शम्भू पत्नी देवमाता चिन्तारत्न प्रियासदा ।
सर्व बिद्या दक्षकन्या दक्षयज्ञ विनाशिनी ॥५॥
अपर्णा नेकवर्णा च पाटला पटला वती ।
पट्टाम्बर परीधाना कलमञ्जीर रञ्जीनी ॥६॥
अमेय विक्रमा क्रूरा सुन्दरी सुर सुन्दरी ।
वनदुर्गा च मातङ्गी मतङ्गमुनिपङ्ग्जिता ॥७॥
ब्राह्मी माहेश्वरी चैन्द्री कौमारी वैष्णवी तथा ।
चामुण्डा चैव वाराही लक्ष्मीश्च पुरुषाकृतिः ॥८॥
विमलोत्कर्षिणी ज्ञाना क्रिया नित्या च बुद्धिदा ।
वहुला वहुल प्रेमा सर्व वाहन वाहना ॥९॥
निशुम्भ शुम्भ हननी महिषासुर मर्द्दिनी ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मधुकैटभ हन्त्री च चण्डमुण्ड विनाशिनी ॥१०॥
सर्वासुरं विनाशो च सर्वदानवघातिनी ॥
सर्व शास्त्र मयी सत्या सर्वास्त्र धारिणी तथा ॥११॥
अनेकशस्त्र हस्ता च अनेकास्त्रस्य धारिणी ॥
कुमारी चैककव्य च कैशोरी युवती यतीः ॥१२॥
अप्रौढा चैव प्रौढा च बृद्धमाता वल प्रदा ॥
य इदंच प्रपठेस्तोत्रं काली नाम शताष्टकम् ॥१३॥
नाशाद्धयं विद्यतेदेवि त्रिषु लोकेषु पार्वति ॥
धनं धान्यं सुतांजायां हयं हस्ति नमेव च ॥१४॥
चतुर्वर्ग तथा चान्ते लभेन्मुक्तिंच शाश्वतीम् ॥
कुमारीं पूजयित्वा तु ध्यात्वा देवीं सुरेश्वरीम् ॥१५॥
पूजयेत्परयाभक्त्या पठेन्नाम शताष्टकम् ॥
तस्य सिद्धिर्भवेद्देवि सर्वेः सुर वरै रपि ॥१६॥
राजानो दाशतां यान्ति राज्यश्रिय मवाप्नुयात् ॥
गोरोचानालक्त ककुङ्कुमेन,
सिन्दूर कर्पूर मधुत्रयेण ॥ विलिरव्य यन्त्रं विधिना विधिज्ञो
भवेत्सदाधार यतापुरारिः ॥१८॥
भौमावास्या निशामग्रे चन्द्रेशतभिषाङ्गते ॥
विलिख्य प्रपठस्तोत्रं स भवेत्सम्पदाम्पदम् ॥१९॥

इति काली अष्टोत्तर शतनामस्तोत्रं समाप्तं शुभम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लोग्ने मानिसलाई दशैंको टीका लगाई दिंदा आशीर्वाद दिने मन्त्र–

आयुर्द्रोणसुते श्रियो दशरथे शत्रुक्षयो राघवे ।
ऐश्वर्यं नहुषे गतिश्च पवने मानञ्च दुर्योधने ॥
शौर्यं शान्त नवे वलं हरधरे सत्यञ्च कुन्ती सुते ।
विज्ञानं विदुरे भवतु भवतां कीर्तिश्च नारायणे ॥
स्वस्त्यस्तुते कुशलमस्तु चिरायुरस्तु, गोवाजि
हस्ति धन धान्य समृद्धि रस्तु । ऐश्वर्य मस्तु बलमस्तु
रिपुक्षयोस्तु, सन्तान वृद्धि सहिता हरि भक्ति रस्तु ॥२॥

आईमाईलाई दशैंमा टीका लगाइ दिदा आशीर्वाद दिने मन्त्र–

भद्रमुस्त शिवंचास्तु महालक्ष्मीः प्रसीदतु ।
रक्षतुत्वां सदा देवी आशिषः सन्तु सर्वदा ॥
ॐ जयन्ती मङ्गलाकाली भद्रकाली कपालिनी ।
दुर्गाक्षमा शिवा धात्री स्वाहा स्वधा नमोस्तुते ॥
जयत्वं देवि चामुण्डे जय भूतार्ति हारिणि ।
जय सर्वगते देवि कालरात्रि नमोस्तुते ॥

समाप्त

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मधुसूदन सुवेदीको प्रकाशित पुस्तकहरू

१. हिन्दु सदाचार पद्धति २. पुस्तकालय विज्ञानको उपादेयता ३. सरलीकृत शिलान्यास विधि ४. स्व.स.से. ऋषिसुवेदीको सम्झनामा शोककाव्य ५. Fundametals of Library and Information Science ६. सरलीकृत मार्कण्डेयाद्यष्ट चिरञ्जीवि पूजाविधि नव ग्रहादि पाठ सहित ७. सरलीकृत सत्यनारायण पूजाविधि ८. सनातन हिन्दुधर्म तथा संस्कार ९. सरलीकृत श्रीलक्ष्मी पूजा विधि १०. सरलीकृत महालक्ष्मी पूजाविधि ११. सरलीकृत अग्निस्थापना विधि १२. सरलीकृत अन्त्यपद्धति १३. सरलीकृत हरितालिका र ऋषिपञ्चमी पूजाविधि व्रतकथा सहित १४. सम्पूर्ण एकादशी महात्म्य सरल पूजाविधि सहित १५. श्री गणेश सहस्रनाम पूजाविधि सहित १६. शारदीय दुर्गा पूजा विधि १७. सरलीकृत तर्पणैकोद्दिष्ट पार्वणैकपार्वण तीर्थश्राद्धविधि १८. सरलीकृत स्वयम्बर पटलाञ्छन पूर्वाङ्गग्रहशान्ति सहित विवाह विधि १९. सरलीकृत ग्रहशान्त्यग्निस्थापन चूडोपनयन वेदारम्भ समावर्तन विधि २०. Om Age Old Eternal Hindu Religion and Sacrament २१. सनातन दैनिक पूजाविधि तथा वार्षिक पर्व निर्देशिका २२. हिन्दु विवाहको इतिहास २३. सनातन विशेष चाडपर्व तथा धार्मिक लेख २४. श्री पशुपतिनाथ र प्रसिद्ध शिवलिङ्गहरू तथा द्वादश ज्योतिर्लिङ्ग २५. सरलीकृत शिवपूजाविधि सहित रूद्राष्टाध्यायी २६. तीर्थयात्र संस्मरण २७. पूर्णिमाव्रत चन्द्रमांपूजाविधि २८. श्री कालिका तथा दुर्गा उपाशना विधि २९. सरलीकृत चतुशिति सिद्धपूजा विधि ३०. अथः मासिक श्राद्ध पद्धति ३१. सरलीकृत ग्रहशान्ति कर्मप्रयोग विधिः ३२. History of the Aryan Marriage – a Sacrament ३३. श्री स्वस्थानी व्रतकथा सरल पूजाविधि सहित ३४. श्री वैभव लक्ष्मी पूजाविधिः व्रतकथासहित ३५. श्री मूलादिजननशान्ति विधिः ३६. सरलीकृत कालसर्पयोग शान्ति विधिः ३७. सरलीकृत तुलादान विधिः ३८. सरलीकृत देवदेवीमूर्तीनां स्थिर-प्राण-प्रतिष्ठा विधिः ३९. सरलीकृत सप्ताह मण्डप पूजा विधिः ४०. सरलीकृत वेदोक्त गृहवास्तु शान्ति प्रयोग ४१. सरलीकृत सोमवार शिवपूजाविधिः (व्रत कथा सहित) ४२.नेपाल अधिराज्यको चतुषष्ठिः स्वयम्भू सिद्धज्योर्तिर्लिङ्ग एवं पशुपतिदर्शनमहिमा (मूर्तिसहित विवरण) ४३. सरलीकृत अश्वत्थवट उद्यापन विधिः ४४. सरलीकृत लक्षदीप प्रज्वालन पूजाविधिः (लाखवत्ती बाल्ने) ४५. सरलीकृत रविवार भगवान् श्रीसूर्य पूजाविधिः (व्रतकथा सहित) ४६. सरलीकृत हनुमत्पूजन विधिः व्रतकथा सहित ४७. सरलीकृत मङ्गलवार गणेश पूजा विधिः व्रतकथा सहित ४८. सरलीकृत आवश्यक व्यवहारोपयोगी स्तोत्र पुष्पाञ्जली ४९. सरलीकृत अथ आशौचनिर्णय : अन्य समस्याहरू ५०. सरलीकृत गरूड पुराण ५१. सरलीकृत श्री नारायणबलि प्रयोग ५२. सरलीकृत श्रीकृष्णाष्टमी व्रत कथा ५३. सरलीकृत अदुःख नवमी ५४. सरलीकृत श्री दुर्गासप्तशती पाठः। ५५. वटसावित्रि व्रत्र, पूजा विधिः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुस्तक पाइने ठेगाना

१. नेशनल बुक सेण्टर, भोटाहिंटी, फोनः ४२२१२६९, ४२४२४०९
२. हरेक पुस्तक भण्डार, भोटाहिंटी, फोनः ४२५२९००
३. रत्नपुस्तक भण्डार, बागवजार, फोनः ४२४८९६३
४. ऋद्धिसिद्धि पूजा सामाग्री केन्द्र, विर्तामोड, झापा, मो. ९८४२६९७४२२
५. पञ्चायन पूजा सामाग्री पसल, दमक, झापा, मो. ९८५२६७८८८
६. हिमाल किराना एवं पूजा पसल, इटहरी, मो. ९८४२०२३६९४
७. पूजा सामाग्री भण्डार, महेन्द्रपुल, पोखरा, फोनः ०६१–५४१४५७
८. रत्न पुस्तक भण्डार माइतिघर, फोनः ४२४०८५०
९. दुर्गा पुस्तक भण्डार, देवपाटन, पशुपती, फोनः ४४६१११६
१०. हरे कृष्ण पूजा सामाग्री भण्डार, जेसिस चोक, बुटवल, मो. ९८४७४७९२४२
११. यूनिभर्सल एजुकेशनल सेन्टर, मङ्गलबजार, पाटन, फोनः ५५२१२१६
१२. वैदिक पूजा सामाग्री भण्डार, पुतलीबजार, नारायणघाट, फोनः ०५६–५२०९०९
१४. जयगुरु बुक्स एण्ड स्टेशनरी, भोटाहिटी, फोनः ४२२२२१९
१५. गुरु पुस्तक पसल, भोटाहिटी, फोनः ४२३९२४२
१६. हेरिटेज पब्लिसर्स एण्ड डिष्ट्रीब्युटर्स फोनः ४२२९७७०
१७. सूचना केन्द्र (पत्रिका पसल) हेटौडा, फोनः ०५७–५२१७३७
१८. हिमालय बुक हाउस, मणिपथ, बुटवल, फोनः ०७१–५४१००९
१९. धार्मिक पुस्तक पसल, नारायणघाट, फोनः ०५६–५३१६१५
२०. भट्टराई पूजा सामाग्री भण्डार, बगर, पोखरा, मो. ९८५६०२६६४१
२१. दैनिक सामाग्री प्रतिष्ठान, विर्तामोड, झापा, फोनः ०२३–६९२२१८
२२. बाबा पूजा सामाग्री भण्डार, पीनपैनी चोक, विराटनगर, मो.: ९८४२२९८६५७
२३. भोटाहिटी बुक्स, भोटाहिटी, मो. ९८५१०७३४५०
२४. शिवशक्ति धार्मिक पुस्तक एवं पूजन सामाग्री केन्द्र, का.वा.सोती, नवलपरासी, मो. ९८४७२४१८०३
२५. सुकुन्दा पुस्तक पसल, भोटाहिटी, फोनः ४२२०३७९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लेखकको परिचय

नाम: मधुसूदन सुवेदी

जन्म: बि.सं. २००० ललितपुर, सानेपा ।

शिक्षा: बि.ए.,बि.लिब. एस्सी एण्ड डिओसी ।

सेवा : विभिन्न मन्त्रालय, विभाग, लोक सेवा आयोग, निर्देशक नेपाल राष्ट्रिय पुस्तकालय, संसद सचिवालय, सर्वोच्च अदालत, केन्द्रीय कानून पुस्तकालय आदीमा ५० वर्षको अनुभव ।

संघसस्था: सङ्कट कालीन निवारण समिति, विश्व हिन्दू महासंघ, ढुङ्गेधारा सत्संग भवन संरक्षण समिति, सानेपा, गीता अध्ययन मण्डल स्वयम्भू, ॐ सत्सङ्ग भवन जावलाखेल, आत्मालोक सन्यास आश्रम, बागडोल, सानेपा स्वास्थ्य चौकी, अन्तर्राष्ट्रिय ब्राह्मण संघ, भारद्वाज संस्कृति सम्वर्धन केन्द्र आदि ।

कृति: हिन्दू सदाचार पद्धति, पुस्तकालय विज्ञानको उपादेयता, शारदीय दुर्गापूजा विधि, स्व.स.से.ऋषी सुवेदीको सम्झनामा शोक काव्य, सरलीकृत सत्यनारायण पूजा विधि, सरलीकृत लक्ष्मी पूजा विधि, सरलीकृत महालक्ष्मी पूजाविधि, सरलीकृत अन्त्यपद्धति, सरलीकृत मार्कण्डेयाद्यष्ट चिरंजीवि पूजाविधि, नव ग्रहादि पाठ सहित, **Fundamentals of Library & Information Science on Nepales Response,** हिन्दू विवाहको इतिहास, सनातन हिन्दू धर्म तथा संस्कार, सरलीकृत अग्निस्थापना विधि, सरलीकृत शिलान्यास विधि, सनातन दैनिक पूजाविधि तथा वार्षिक पर्व निर्देशिका, **Om Age Old Eternal Hindu Religion & Sacrament,** सरलीकृत स्वयम्वर पटलाञ्छन पूर्वाङ्गग्रहशान्ति सहित विवाह विधि, सरलीकृत ग्रहशान्त्यग्निस्थापन चूडोपनयन वेदारम्भ समावर्तन विधि, सरलीकृत हरितालिका र ऋषिपञ्चमी पूजाविधि, सम्पूर्ण एकादशी महात्म्य सरल पूजाविधि सहित, श्री गणेश सहस्रनाम पूजाविधि, सनातन विशेष चाडपर्व तथा धार्मिक लेख,श्रीपशुपतिनाथ र द्वादश ज्योतिर्लिङ्ग, शिवपूजाविधि सहित रूद्राष्टाध्यायी, तीर्थयात्रा संस्मरण, सरलीकृत पूर्णिमाव्रत चन्द्रमापूजाविधि, सरलीकृत मासिक श्राद्ध पद्धति, **History of the Aryan Marriage a Sacrament,** श्री स्वस्थानी व्रतकथा सरल पूजाविधि सहित, स्तोत्र पुष्पाञ्जली, आशौचनिर्णय, गरूड पुराण, नारायणवलि प्रयोग, श्री कृष्ण जन्माष्टमी, अदुःख नवमी, सरलीकृत वतसावित्री व्रत पूजाविधि सहित, सरलीकृत जय सन्तोषी माताको (शुक्रवार व्रतकथा) पूजाविधि सहित, सरलीकृत ऋषितर्पणी पूजाविधि श्रावणी पद्धति आदि ।

भ्रमण: भारत, श्रीलंका, थाईलैण्ड, हङ्कङ्क, चीन ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection